http://www.sgbauonline.com/



# M.A. Part–II (Semester–III) Examination

## SANSKRIT

## Paper—III

## (Gadya & Mahakavya)

Time : Three Hours] [Maximum Marks : 80

सूचना :— निर्देशाभावे उत्तराणि स्वीकृतभाषयैव लिखत।

(कादम्बरी महाश्वेतावृत्तान्तः)

1. (अ) परिच्छेदैकस्य अनुवादं कुरुत :— 10

(1) गन्धर्वाणां तु दक्षात्मज द्वितयसंभवं तदेव कुलद्वयं जातम्। यत्र मुनेस्तनयः सेनादीनां पञ्चदशानां भ्रातृणामधिकोगुणैः षोडशिचित्ररथा नाम समुत्पन्नः। स किल त्रिभुवन प्रख्यात पराक्रमो भगवतासमस्तसुरमौलिमालालालित चरणनलिनैनाखण्डलेन सुहृच्छब्देनोबृंहितप्रभावः सर्वेषां गन्धर्वाणां मधिपत्यमसिलतामरीचिनिचयमेचकितेन बाहुना समुपार्जितं शैशव एवाप्तवान्। इतश्च नातिदूरे तस्यास्माभ्दारतवर्षादुत्तरेणान्तरे किम्पुरुषनाम्नि वर्षे वर्षपर्वतो हेमकूटो नाम निवासः।

(2) इत्येवम् अभिधीयमानश्च तेन किञ्चिदुपजातलज्ज इव प्रत्यवादीत-कपिञ्जल ! किं सामन्यथा सम्भावयसि। नाहमेवमस्या दुर्विनीतकन्यकाया मर्षयाम्यक्षमालाग्रहणापराधमिगम् इत्यभिधाय अलीकलोपकान्तेन प्रयत्नविरचितभीषण-भ्रुकुटिभूषणेन चुम्बनाभिलाषस्फुरिताधरेण मुखेन्दुना मामवदत्—चपले ! प्रदेशादस्मारिकामक्षमालामदत्वा पदात् पदमपि न गन्तव्यम्' इति। तच्च श्रुत्वाहमात्मकण्ठादुन्मुच्यमकरध्वजलोत्पादम्भलीलापुष्पाञ्जलिमेकावली 'भगवन् ! गृह्यतामक्षमाला' इति मन्मुखासक्तदृष्टेः शून्यहृदयस्यास्य प्रसारिते पाणौ निधाय स्वदेसलिलस्नातापि पुनः स्नातुमवातरम्। उत्थाय च कथमपि प्रयत्नेन निम्नगेव प्रतीपं नीयमाना सखीजनेन बलादम्बया सह तमेव चिन्तयन्ती स्वभवनमयासिषम्।

(ब) कयोरपि द्वयोः टिप्पणी लिखत :— 6

(1) महाश्वेतायाः विरहदशा

(2) बाणस्य भाषाशैली

(3) पुण्डरीकस्य मनोदशा

(4) हेमकूटः

2. (अ) एकस्यानुवादं कुरुत :— 10

(1) अथ मदीयेनेव हृदयेन कृतरागसंविभागे लोहितायति गगनतलोपान्तावलम्बिनि रविबिम्बे, सरागादिलसभरानुरक्तायां कृतकमलशयनायामनङ्गातुरायामिव पाण्डुतां व्रजन्त्यामातपलक्ष्म्याम्, गैरिक गिरिसलिल प्रपातपाटलेषु कमलवनेभ्यः समुत्थायं गनगजयूथेष्विव पुञ्जीभवत्सु भास्करकिरणेषु, गगनावतार विश्रामलालसानां रविरथवाजिनां हर्षहेषारवप्रतिशब्दकेन सह विशति मेरुगिरिगह्वरं वासरे, मुकुलितरक्तपङ्कजपुटप्रविष्टमधुकरावलीषु रविविरहमूर्च्छान्धकारितहृदयास्विव प्रारब्धनिमीलनासु पद्मिनीषु ग्रासीकृत सामान्यमृणाललताविवरसंक्रमितानीव परस्परहृदयान्यादाय विघटमानेषु रथाङ्गनाम्नां युगलेषु सा छत्रग्राहिणी समागत्य अकथयत्-भर्तृदारिके ! तयोर्मुनिकुमारयोरन्यतरो द्वारि तिष्ठति कथयति चाक्षमालामुपयाचितुमागतोऽस्मि' इति।



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(2) अहन्तु तदाकर्ण्य सुधामृतमये ह्रद इव निमग्ना, रतिरसमयमुदधिमिवावतीर्णा, सर्वानन्दानामुपरि वर्तमाना, सर्वमनोरथानामग्रमिवाधिरूढा, सर्वोत्सवानामतिभूमिमिवाधिशयाना, तत्कालोपजातया लज्जया किञ्चिदवनम्यमान-वदनत्वादरपृष्टकपोलोदरैः ग्रथितैरिवोर्ध्वपरि पतानानुबन्धदर्शितमालाक्रमैः अप्राप्तपक्ष्मसंश्लेषतया उपजातप्रथिममयैरमलैरानन्दबाष्पजलबिन्दुभिः स्रवद्भिरावेध्यमानप्रहर्षप्रसदा, तत्क्षणमचिन्तयम् — 'दिष्टया तावदयमनङ्गोमामिव तमप्यनुबध्नाति, यत्सत्यमनेनमेसन्ताप्यतापदेशेन दर्शितानुकूलता। यदि च सत्यमेव तस्येदृशी दशा वर्तते, ततः किमिव, नोपकृतमनेन, किंवा नोपपादितम्, को वानेनापरः, समानो बन्धुः।

(ब) कयोरपि द्वयोः टिप्पणी लिखत :— 6

(1) तरलिका

(2) अक्षमाला

(3) पारिजातमञ्जरी

(4) कपिञ्जलस्य कामज्वरशमनोपचारः।

3. (अ) शोकाभिभूतायाः महाश्वेतायाः व्यक्तिचित्रणं कुरुत। 10

अथवा

'वाणी बाणो बभूव' इत्युक्तिं प्रतिपादयत।

(ब) द्वयोः ससंदर्भस्पष्टीकरणं कुरुत :— 6

(1) अनुभवसमां वेदनामुपजनयन्ति सुहृज्जनस्य दुःखानि।

(2) आशया हि किमिव न क्रियते।

(3) सर्वथाहमनेन त्यक्तत्रपेण निरपत्रपाणामग्रेलीकृता।

(4) किं नया दृष्ट्या पृष्ट्या वा कृत ब्राह्मणवध महापातकया करोति महाभागः।

4. (अ) द्वयोः अनुवादं कुरुत :— 10

(1) प्रोन्मुच्येतापि जीवितं सन्दिग्धोऽप्यस्य समागमो यदि स्यात्। भगवत्या तु तत पुनः स्वयमेव समागमसरस्वती समाकर्णिता, अनुभवे च तो विकल्पः। कथञ्च तादृशानामप्राकृताकृतीनां महात्मनामवितथगिरां गरीयसापि कारणेन गिरि वैतथ्यमास्पदं कुर्यात्। उत्तरेण च तेन जीवनयाः कीदृशो समागतिः, अतो निःसंशयमसावुपजातकारुण्यो महात्मा पुनः प्रत्युज्जीवनार्थमेवैनमुत्क्षिप्य सुरलोकं नीतवान्।

(2) अचिन्त्यो हि महात्मनां प्रभावः बहुप्रकाराश्च संसारवृत्तयः, चित्रञ्च दैवम्, आश्चर्यातिशययुक्ताश्च तपःसिद्धयः, अनेकविधाश्च कर्म्मणां शक्तयः। अपि च सनिपुणमपि विमृशद्भिः किमिवान्यत्तदपहरणे कारणमाशाङ्क्येत जीवितप्रदानादृते। न चासम्भाव्यमिदवगन्तव्यं भगवत्या, चिरप्रवृत्त एष पन्थाः। तथाहि विश्वावसुना गन्धर्वराजेन मेनकायामुत्पन्नां प्रमद्वरां नाम कन्यकामाशीविषविलुप्तजीवितां स्थूलकेशाश्रमे भार्गवस्य च्यवनस्य नप्रा प्रमतितनयो मुनिकुमारको रुरुनाम स्वायुषोऽर्द्धेन योजितवान्।

(3) अर्जुनञ्चाश्वमेधतुरगानुसारिणम् आत्मजेन बभ्रुवाहननाम्ना समरशिरसि शरापहृतप्राणम् उलूपी नाम नागकन्यका सोच्छ्वासमकरोत्। अभिमन्युतनयश्च परीक्षितम् अश्वत्थामास्त्रपावकपरिप्लुष्टम्, उदरादुपरतमेव विनिर्गतम्, उत्तराप्रलापोपजनितकृपो भगवान वासुदेवो दुर्लभानसून् प्रापितवान्, उज्जयिन्याञ्च सान्दीपनिर्द्विजतनयमन्तकपुराद-पहृत्य त्रिभुवनवन्दितचरणः स एवानीतवान्।



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(4) अत्रापि कथञ्चिदेवमेव भविष्यति। तथापि किं क्रियते, क उपालभ्यते। प्रभवति हि भगवान् विधिः, बलवति च नियतिः, आत्मेच्छया न शक्यमुच्छ्रसितुमपि, अतिपिशुनानि चाल्यैकान्तनिष्ठूरस्य दैवहतकस्य विलसितानि न क्षमन्ते दीर्घकालमव्याजरणीयं प्रेम। प्रायेण च निसर्गत एवानयतं स्वभाव भङ्गुराणि सुखानि आयतस्वभावानि च दुःखानि।

(ब) चन्द्रापीडेण महाश्वेता कथं आश्वासिता ? 6

अथवा

सन्ध्याकालीनं प्रकृतिचित्रणं कुरुत।

5. योग्यम उत्तरं विचिनुत (केऽपि षोडश) :— 16

(1) 'कादम्बरी' शब्दस्य कोऽर्थः ?

(i) भीरुस्त्री (ii) अप्सरा

(iii) मदिरा (iv) परिचारिका

(2) महाश्वेतायाः दासी अस्ति —

(i) पत्रलेखा (ii) मदनिका

(iii) तरलिका (iv) चन्द्रलेखा

(3) 'प्रभुप्रसादलवोऽपि प्रागल्भ्यमधीर प्रकृतेः।' कस्योक्तिः अस्ति ?

(i) चन्द्रापीडस्य (ii) महाश्वेतायाः

(iii) कपिञ्जलस्य (iv) तालीकायाः

(4) 'पञ्चभिर्महाभूतैरारारब्धमीदृशी धवलतां धत्ते शरीरम्।' कं वा कां प्रति एतदुक्तिः ?

(i) चन्द्रपीडम् (ii) कपिञ्जलम्

(iii) श्वेतकेतुम् (iv) महाश्वेताम्

(5) 'देहि मे हृदयेऽवकाशम्' कस्य/कस्याः याचनास्ति ?

(i) महाश्वेतायाः (ii) पुण्डरीकस्य

(iii) चन्द्रपीडस्य (iv) कपिञ्जलस्य

(6) 'क्षुद्रजनक्षुण्ण एष मार्गः' कस्योक्तिः आस्ति ?

(i) कपिञ्जलस्य (ii) चन्द्रपीडस्य

(iii) पुण्डरीकस्य (iv) महाश्वेतायाः

(7) पुण्डरीकस्य पिता अस्ति —

(i) श्वेतकेतुः (ii) अश्वकेतुः

(iii) चन्द्रकेतुः (iv) धूमकेतुः

(8) पुण्डरीकस्य अनन्यमित्रम् अस्ति —

(i) वैशम्पायनः (ii) शूद्रकः

(iii) कपिञ्जलः (iv) चित्ररथः

(9) महाश्वेतायाः आश्रमः कुत्र आसीत् ?

(i) अच्छोदसरोवरस्यपार्श्वे (ii) हेमकूटशिखरे

(iii) अलकायाः पार्श्वे (iv) पम्पासरोवरस्य पार्श्वे



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(10) महाश्वेता कस्य पुत्री आसीत् ?

(i) चित्ररथस्य (ii) हंसस्य

(iii) इन्द्रायुधस्य (iv) भानुकेतोः

(11) गन्धर्वराजहंसस्य पत्नी का आसीत् ?

(i) तरलिका (ii) शची

(iii) गौरी (iv) रतिः

(12) महाश्वेताविलापप्रसङ्गे कस्य रसस्योद्भवं भवति ?

(i) वीररसस्य (ii) हास्यरसस्य

(iii) विप्रलम्भशृङ्गारस्य (iv) भयानकरसस्य

(13) 'कुसुमायुधः' किम् अस्ति ?

(i) वृक्षः (ii) कामदेवः

(iii) सरोवरः (iv) आभूषणम्

(14) अभिमन्योः पुत्रः अस्ति —

(i) अश्वत्थामा (ii) परीक्षितः

(iii) सान्दीपनिः (iv) शूरसेनः

(15) शूरसेनस्य कन्याऽस्ति —

(i) कुन्ती (ii) माद्री

(iii) द्रौपदी (iv) शकुन्तला

(16) कस्य कस्याः दक्षिणलोचनं स्पन्दितम् ?

(i) चन्द्रापीडस्य (ii) कपिञ्जलस्य

(iii) महाश्वेतायाः (iv) तरलीकायाः

(17) 'नास्ति खल्वसाध्यं नाम भगवतो मनोभुवः' अत्र मनोभुवः इति नामधेयम् अस्ति —

(i) ईर्ष्यायाः (ii) द्वेषस्य

(iii) कामदेवस्य (iv) शिवस्य

(18) 'निर्भर्त्सयैतामस्य दुराचारः' कस्योक्तिः अस्ति ?

(i) कपिञ्जलस्य (ii) तरलिकायाः

(iii) चन्द्रापीडस्य (iv) महाश्वेतायाः

(19) 'मूढो हि मदनेनायास्यते' कं प्रति उक्तिरियम् ?

(i) पुण्डरिकं प्रति (ii) महाश्वेतां प्रति

(iii) कपिञ्जलं प्रति (iv) चन्द्रापीडं प्रति

(20) कुसुममञ्जरी गुम्फितासीत् —

(i) पारिजातपुष्पैः (ii) कमलपुष्पैः

(iii) कुन्दपुष्पैः (iv) मालतीपुष्पैः



http://www.sgbauonline.com/